শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ ষটিত্রিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষটিত্রিংশঃ সর্গঃ ॥

## মাল্যৱন্তং নির্ভর্ত্স্য নগরগুপ্তিং ৱিধায রাৱণস্য নিজান্তঃপুরে গমনম্

তৎ তু মাল্যৱতো ৱাক্যং হিতমুক্তং দশাননঃ।
ন মর্ষযতি দুষ্টাত্মা কালস্য ৱশমাগতঃ ॥ **6.36.1** ॥

স বদ্ধ্ৱা ভ্রুকুটিং ৱক্ত্রে ক্রোধস্য ৱশমাগতঃ।
অমর্ষাৎ পরিৱৃত্তাক্ষো মাল্যৱন্তমথাব্রৱীৎ ॥ **6.36.2** ॥

হিতবুদ্ধ্যা যদহিতং ৱচঃ পরুষমুচ্যতে।
পরপক্ষং প্রৱিশ্যৈৱ নৈতচ্ছ্রোত্রগতং মম ॥ **6.36.3** ॥

মানুষং কৃপণং রামমেকং শাখামৃগাশ্রযম্।
সমর্থং মন্যসে কেন ত্যক্তং পিত্রা ৱনাশ্রযম্ ॥ **6.36.4** ॥

রক্ষসামীশ্ৱরং মাং চ দেৱানাং চ ভযঙ্করম্।
হীনং মাং মন্যসে কেন অহীনং সর্ৱৱিক্রমৈঃ ॥ **6.36.5** ॥

ৱীরদ্ৱেষেণ ৱা শঙ্কে পক্ষপাতেন ৱা রিপোঃ।
ৎৱযাহং পরুষাণ্যুক্তো পরপ্রোৎসাহনেন ৱা ॥ **6.36.6** ॥

প্রভৱন্তং পদস্থং হি পরুষং কোঽভিভাষতে।
পণ্ডিতঃ শাস্ত্রতত্ত্ৱজ্ঞো ৱিনা প্রোৎসাহনেন ৱা ॥ **6.36.7** ॥

আনীয চ ৱনাৎ সীতাং পদ্মহীনামিৱ শ্রিযম্।
কিমর্থং প্রতিদাস্যামি রাঘৱস্য ভযাদহম্॥ **6.36.8**॥

ৱৃতং ৱানরকোটীভিঃ সসুগ্রীৱং সলক্ষ্মণম্।
পশ্য কৈশ্চিদহোভিশ্চ রাঘৱং নিহতং মযা॥ **6.36.9**॥

দ্ৱন্দ্ৱে যস্য ন তিষ্ঠন্তি দৈৱতান্যপি সংযুগে।
স কস্মাদ্ রাৱণো যুদ্ধে ভযমাহারযিষ্যতি॥ **6.36.10**॥

দ্ৱিধা ভজ্যেযমপ্যেৱং ন নমেযং তু কস্যচিৎ।
এষ মে সহজো দোষঃ স্ৱভাৱো দুরতিক্রমঃ॥ **6.36.11**॥

যদি তাৱৎ সমুদ্রে তু সেতুর্বদ্ধো যদৃচ্ছযা।
রামেণ ৱিস্মযঃ কোঽত্র যেন তে ভযমাগতম্॥ **6.36.12**॥

স তু তীর্ত্ৱার্ণৱং রামঃ সহ ৱানরসেনযা।
প্রতিজানামি তে সত্যং ন জীৱন্ প্রতিযাস্যতি॥ **6.36.13**॥

এৱং ব্রুৱাণং সংরব্ধং রুষ্টং ৱিজ্ঞায রাৱণম্।
ৱ্রীডিতো মাল্যৱান্ ৱাক্যং নোত্তরং প্রত্যপদ্যত॥ **6.36.14**॥

জযাশিষা তু রাজানং ৱর্ধযিৎৱা যথোচিতম্।
মাল্যৱানভ্যনুজ্ঞাতো জগাম স্ৱং নিৱেশনম্॥ **6.36.15**॥

রাৱণস্তু সহামাত্যো মন্ত্রযিৎৱা ৱিমৃশ্য চ।
লঙ্কাযাস্তু তদা গুপ্তিং কারযামাস রাক্ষসঃ॥ **6.36.16**॥

ৱ্যাদিদেশ চ পূর্ৱস্যাং প্রহস্তং দ্ৱারি রাক্ষসম্।
দক্ষিণস্যাং মহাৱীর্যৌ মহাপার্শ্ৱমহোদরৌ॥ **6.36.17**॥

পশ্চিমাযামথ দ্ৱারি পুত্রমিন্দ্রজিতং তদা।
ৱ্যাদিদেশ মহামাযং রাক্ষসৈর্বহুভির্ৱৃতম্॥ **6.36.18**॥

উত্তরস্যাং পুরদ্বারি ব্যাদিশ্য শুকসারণৌ।
স্বযং চাত্র গমিষ্যামি মন্ত্রিণস্তানুবাচ হ॥ **6.36.19** ॥

রাক্ষসং তু বিরূপাক্ষং মহাবীর্যপরাক্রমম্।
মধ্যমেঽস্থাপযদ্ গুল্মে বহুভিঃ সহ রাক্ষসৈঃ॥ **6.36.20** ॥

এবং বিধানং লঙ্কাযাং কৃৎবা রাক্ষসপুঙ্গবঃ।
কৃতকৃত্যমিবাত্মানং মন্যতে কালচোদিতঃ॥ **6.36.21** ॥

বিসর্জযামাস ততঃ স মন্ত্রিণো
  বিধানমাজ্ঞাপ্য পুরস্য পুষ্কলম্।
জযাশিষা মন্ত্রিগণেন পূজিতো
  বিবেশ সোঽন্তঃপুরমৃদ্ধিমন্মহৎ॥ **6.36.22** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে বাল্মীকীযে আদিকাব্যে যুদ্ধকাণ্ডে ষটিত্রিংশঃ সর্গঃ ॥